॥ ओ३म् ॥

काल:पचति भूतानि काल:
संहरते प्रजा:।
काल: सुप्तेषु जागर्ति
कालो हि दुरतिक्रम:।।

( चाणक्य-नीति )

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2018-20
Approved Journal by UGC - No 40484

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

॥ ओ३म् ॥

न पश्यति च जन्मान्ध:
कामान्धो नैव पश्यति।
न पश्यति मदोन्मत्तो
ह्यर्थी दोषान् न पश्यति।।

( चाणक्य-नीति )

संपादकीयकार्यालय: ए-२/३२, वजीराबाद मार्ग:, भजनपुरा, देहली-११००५३, दूरभाष: ९३११०८६७५१
ई-मेल: sanskritsamvad@gmail.com वेवसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

卐 वर्षम्-८ 卐 अंक:-५ ( १७१ ) 卐 १ सितम्बर: २०१८ त: १५ सितम्बरमास: २०१८ पर्यन्तम् 卐 विक्रमसंवत्-२०७५ 卐 सृष्टिसंवत्-१,९६,०८,५३,११६ 卐 पृष्ठम्-८

## प्रधानमंत्रिणा मोदिना'मन की बात' कार्यक्रमे कृता संस्कृतस्य चर्चा

नवदेहली। रक्षाबन्धन श्रावणी पुर्णिमाया: अवसरे संस्कृतदिवसे "मन की बात" कार्यक्रमे पधानमंत्री श्री नरेन्द्र मोदी संस्कृतस्य महत्व विषये चर्चा कृतवान। ते सर्वं संस्कृतज्ञान् शुभाशीश



दत्वा उक्तवन्त: यत् संस्कृत विश्वस्य प्राचिनतमा भाषारस्ति। यो वेदकालत: अद्यपर्यन्तं ज्ञानस्य प्रचार-प्रसारे स्व महत्वपूर्ण भुमिका निर्वहति। शास्त्रे जीवनमूल्योऽस्ति। यथा-विज्ञान, कृषिविज्ञान स्वास्थ्य, गणित, अर्थशास्त्रं अथवा पर्यावरणम्।

ते कर्नाटक राज्यस्य मंटुर ग्रामस्योल्लेखं कृत्वा उक्तवन्त: यत् अस्य ग्रामस्य सर्वे जना: संस्कृते व्यवहरन्ति। संस्कृते विश्वस्य शब्दकोषोऽस्ति। एषु 2000 धातु, 200 प्रत्यय, 22 उपसर्ग एवं समास माध्यमेन अनन्त शब्दरचना भवितुं शक्यते। अत: सुक्ष्मातिसुक्ष्म एवं भाषां व्यक्त कर्तुं शक्यते। अस्य एकं महत्वपूर्ण विशेषताऽस्ति यत् स्व भाषणं। सुभाषित माध्यमेन सम्यक् ज्ञान प्राप्तुं शक्नुम:। अस्माकं परमपरया संस्कृत संयुक्तोऽस्ति अत: अस्य ज्ञानं सरलमस्ति। ते ज्ञानम् एवं गुरूं अतुल्य एवं अमूल्य उक्तवन्त:।

## देववाणीपरिषदस्त्रिचत्वारिंशत्तम-सङ्कल्पनादिवससमारोहोऽन्वष्ठीयत

21.08.2018 तमे दिनाङ्के दिल्लीस्थाया: देववाणीपरिषदो दिल्लीविश्वविद्यालयस्याङ्गभूतस्य च पीजीडीएवीसान्ध्यमहाविद्यालयस्य संयुक्ततत्त्वावधाने देववाणीपरिषदस्त्रिचत्वारिंशत्तम:



सङ्कल्पनादिवससमारोह: समनुष्ठित:। महोऽयं वाणीविहारस्थे रमालये नेहरुनगरस्थे च पीजीडीएवीसान्ध्यमहाविद्यालये अन्वष्ठीयत। रमालये प्रात:कालिकमौद्घाटनिकसत्रमायोज्यत, यत्र परिषदध्यक्षेण आचार्यरमाकान्तशुक्लेन, परिषत्संरक्षिकया श्रीमत्या रमादेव्या, परिषन्महासचिवेन च



ऋषिराजपाठकेन दीपप्रज्वालनमकारि। रम्या शुक्ला सरस्वतीवन्दनं प्रास्तोत्। परिषदोऽध्यक्षेण, संरक्षिकया, महासचिवेन च संकल्पनादिवसमभिलक्ष्य अभिभाषितम्। कार्यक्रमस्य विशिष्टमाकर्षणमासीद् देववाणीपरिषदा प्रकाशितानां ग्रन्थानां प्रदर्शनी। एतदनु पीजीडीएवीसान्ध्यमहाविद्यालये सविस्तरं समारोह: समायोज्यत।

शेषभाग:द्वितीयपुटे

## संस्कृतदिवसस्यानवसरे राष्ट्रियसंस्कृतसंस्थानेन संस्कृतसेवाव्रतीति पुरस्कार प्रदानम्

नवदेहली। संस्कृतं नाम दैवी वाक् इति प्रसिद्धा वेदवाणी भारतस्य प्राचीनसंस्कृते: विज्ञानस्य च अद्वितीयनिधिरिव राराज्यते । तस्या भाषाया: संरक्षणार्थं प्रचारार्थं प्रसारार्थं च आभारतं प्रतिवर्षं श्रावणमासस्य पूर्णिमायां तिथौ संस्कृतदिनम् आचर्यते । अधुना संस्कृतदिनात् दिनत्रयं पूर्वं दिनत्रयं परं च सम्मेल्य संस्कृतसप्ताहाचरणं विधीयते । अत: संस्कृतसप्ताहमुपलक्ष्य नवदेहलीस्था: पञ्जीकृता:




16 संस्था: भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयेन सह मिलित्वा संस्कृतभाषाया: विकासविषये प्रचारप्रसाराय च विविधान् कार्यक्रमान् चक्रु: । तदङ्गतया आगस्तमासस्य 28 दिनाङ्के सर्वा: संस्था: मानवसंसाधनविकासमन्त्रालयस्य उच्चशिक्षाया: सचिवस्य श्री सुब्रह्मण्यं महोदयस्य आध्यक्ष्ये नवदेहलीस्थस्य राष्ट्रियसङ्ग्रहालयस्य सभाप्राङ्गणे समवेता: । सन्दर्भे अस्मिन् प्रतिवर्षमिव अस्मिन् वर्षे अपि राष्ट्रियसंस्कृतसंस्थानस्य पक्षत: संस्कृतसेवाव्रतीति पुरस्कारं संस्कृतक्षेत्रात् भिन्नेभ्य: संस्कृतस्य प्रचारप्रसारसंरक्षणे कटिबद्धेभ्य: त्रिभ्य: विद्वद्भ्: प्रादात् ।

शेषभाग:द्वितीयपुटे

## हरियाणा प्रदेशे नवनिर्मित-महर्षि-वाल्मीकि-संस्कृत विश्वविद्यालयस्य कुलपतिरूपेण चित: डॉ.श्रेयांशद्विवेदी

कैथल। कैथल मण्डलस्य मुंदडी ग्रामे निर्माणाधीन महर्षि वाल्मीकि संस्कृत विश्वविद्यालस्य प्रथम कुलपति डॉ. श्रेयांश द्विवेदी पदभारं ग्रहीतवन्त:। परिसर निर्माण समारोहे संस्कृतस्य



विद्वान्स: सम्मिलित: अभवत्। डॉ द्विवेदी उक्तवान् यत् विश्वविद्यालय स्तरे यो विषय: आंग्ल माध्यमेन भवति स: संस्कृते भविष्यति। ते उक्तवन्त: देशे षोड्स (16) संस्कृत विश्वविद्यालयोऽस्ति। परञ्य तत्र अन्य भाषायामपि अध्ययनं भवति परञ्य अस्मिन् विश्वविद्यालये संस्कृते अध्यापनं भविष्यति। प्रदेशे संस्कृत शिक्षा अध्यापनाय 70 गुरुकुलानां मान्यता अस्य विश्वविद्यालय माध्यमेन भविष्यति। ते उक्तवन्त: यत् आगामि सत्रत: अत्र अध्यापनं भविष्यति। गत् 2016 तमे वर्षे मुख्यमंत्री मनोहरलालखट्टर वाल्मीकि जयन्ति अवसरे अस्य घोषण कृतमस्ति। देशस्य सर्वे विद्वान्स: श्रेयांश द्विवेदी महोदयं शुभकाना प्रदत्तम्।

# अन्तर्विद्यालयीय-संस्कृत-श्लोकोच्चारणस्पर्धायाः समायोजनम्

बिरला पब्लिक स्कूल,पिलानी,इत्यत्र 25.08..2018तमे दिनांके संस्कृतदिवसमालक्ष्य अन्तर्विद्यालयीय-संस्कृत-श्लोकोच्चारणस्पर्धा





समायोज्यत यत्र 34 प्रतिस्पर्धिभिः कालिदास-भर्तृहरि-प्रणीतेभ्यो मेघदूत-रघुवंश-कुमारसम्भवाभिज्ञानशाकुन्तल-नीतिशतकेभ्यः श्लोकाः श्राविताः। ओ.पी.जिन्दल पब्लिक स्कूल, हिसार इत्यनेन दलेन चलवैजयन्ती जिता।

'विजय हाल' इत्यत्र मुख्यातिथिना प्राचार्येण आलोकेश सेन महाभागेन अध्यक्षेण पद्मश्री-विभूषितेन डॉक्टर रमाकान्तशुक्लेन च दीपं-प्रज्वाल्य समुद्घाटिते अस्मिन् कार्यक्रमे संयोजकाभ्यां मध्य विभागप्रधानाध्यपका. अभिनवशुक्ल-डा.शेफाली शर्ममहाभागाभ्यां मुख्यातिथेरध्यक्षस्य निर्णायकयोः डा.चन्द्रभूषण झा-



डा.ऋषिराजपाठकयोश्च स्वागतं कृतम्। तदनन्तरं पञ्चविंशतिप्रायैश्छात्रैः डा.रमाकान्तशुक्लप्रणीतया 'वाणीं वयं वन्दामह' इत्यनया गीतिकया सरस्वती-वन्दना कृता। तदनु 'हम होंगे कामयाब' इत्यस्य गीतस्य 'वयं सफला भविष्यामः' इतिशीर्षकः संस्कृतानुवादः समूहगानरूपेण प्रास्तूयत।

अथ सत्रद्वये सप्तदश विद्यालयानां चतुस्त्रिंशद्भिः प्रतिस्पर्धिभिः कण्ठस्थ-श्लोकानां पाठः कृतः। अंशुमन सिंह-दीपांशु गुप्त-सञ्चालितायामस्यां प्रतिस्पर्धायां कनिष्ठवर्गे कु. गौरिका( ओ.पी.जिंदल,हिसार )प्रथमं,कु.गौरी चौधरी( डालमिया, चिड़ावा) द्वितीयं श्री सौरभ चौखानी( बी.पी.एस.,पिलानी )च तृतीयं पुरस्कारं प्रापन्।

वरिष्ठवर्गे कु.नीहारिका दुबे( ओ.पी.जिन्दल, हिसार )प्रथमं, कु.हिमांकनी मिश्रा( महारानी गायत्री देवी, जयपुर )द्वितीयं कु. प्रज्ञा कुमारी( डालमिया, चिड़ावा )च तृतीयं पुरस्कारं प्रापन्।

अस्मिन्नवसरे अध्यक्षेणोक्तं यदनया प्रतिस्पर्धया नूतनः कश्चन पन्थाः प्रदर्शितोस्ति येन सर्वेषां विद्यालयानां सकाशे स्मरणीयानां सुभाषितानां संग्रहः सुलभीभूतः। तेन संयोजकानुरोधात् स्वप्रसिद्धं गीतं 'भाति मे भारतम्'सर्वैःश्रोतृभिः सह संमिल्य गीतम्।

**प्रथमपुटस्य शेषभागः**

## संस्कृतदिवसस्यानवसरे राष्ट्रियसंस्कृतसंस्थानस्य....

पुरस्कारोऽयं हैदराबादनगरस्य पोलीस् शाखायाः भूतपूर्वमहानिदेशकाय (डि.जी.पि) डा. अरविन्दरावमहोदयाय एवमेव जयपुरस्य वित्तविभागात् सेवानिरताय



पण्डितसत्यदेवशर्ममहोदयाय तथैव च नागपुरे लब्धजन्मने रिजर्व बेंक आफ इंडियातः प्रबन्धकपदात् सेवानिरताय श्री



नन्दकिशोररघुनाथकीर्तिपत्तर्किने महोदयाय च प्रादीयत । समावेशे अस्मिन् सर्वेभ्यः स्वागतं राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिना प्रो.



परमेश्वरनारायणशास्त्रिणा तथा धन्यवादवितरणं श्रीलालबहदूरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिना प्रो. रमेशकुमारपाण्डे महोदयेन च विहितम् । सभासञ्चालनं डा.मधुकेश्वभट्टः अकरोत् । कार्यक्रमे विभिन्नाः प्रमुखाः आचार्याः विभिन्नसंस्थाप्रमुखाः छात्राः संस्कृतसेवकाश्च उपस्थिताः आसन् ।

**प्रथमपुटस्य शेषभागः**

## देववाणीपरिषदस्त्रिचत्वारिंशत्तम-.....

तत्र कार्यक्रमस्य शुभारम्भः श्रद्धाशर्मा-अर्चना-कुसुम-दुर्गा-पलक-हिमांशु-प्रभृतिभिश्छात्रच्छात्राभिः कृतेन ईशोपनिषन्मन्त्रपाठेनाभूत्। ऋषिराजपाठकेन साम गीतम्। परिषत्सहसचिवेन योगेशशर्मणा च सरस्वतीवन्दनं प्रस्तुतम्। कार्यक्रमे मुख्यातिथिरूपेण नवदिल्लीस्थायाः डीएवीमहाविद्यालयप्रबन्धनसमितेः कोषाध्यक्षाः डा. एम. सी. शर्माणः, सारस्वतातिथिरूपेण हरियाणायाः पिहोवास्थस्य डीएवीस्नातकोत्तरमहाविद्यालयस्य प्राचार्याः डा. कामदेवझामहाभागाः उपस्थिताः समभूवन्। विशिष्टं सान्निध्यं पीजीडीएवीसान्ध्यमहाविद्यालयस्य प्राचार्याणां डा. रवीन्द्रकुमारगुप्तमहोदयानामभूत्। परिषदध्यक्षेण आचार्यरमाकान्तशुक्लेन मुख्यातिथीनां डा. एम. सी. शर्ममहोदयानाम्, सारस्वतातिथीनां डा. कामदेवझामहोदयानाम्, प्राचार्याणां डा. रवीन्द्रकुमारगुप्तमहोदयानाम्, संस्कृतविभागाध्यक्षाणां डा. सत्यकामशर्ममहोदयानां च साहित्यप्रदानेन अभिनन्दनमकारि। एतदनु परिषत्सहसचिवेन श्रीमता योगेशशर्मणा विरचितस्य देववाणीपरिषदा च प्रकाशितस्य परिवर्तनम् इत्याख्यस्य नाटकस्य लोकार्पणं प्राचार्यमहोदयस्य करकमलाभ्याम् अन्यैरतिथिभिश्च अभूत्। अतः परं नाटककर्तुः श्रीमतो योगेशशर्मणः वक्तव्यमभूत्। तदनु प्राचार्यैः डा. रवीन्द्रकुमारगुप्तैः संस्कृतभाषायाः महत्त्वम् उद्घाटितम्। पठितवाणिज्यशास्त्रैरपि तैः संस्कृतेन भाषितमिति समेषाम् आश्चर्यमकरोत्। भारतीयसंस्कृतिम् आलम्ब्य वदद्भिः मुख्यातिथिभिः डा. एम.सी.शर्मभिः कथितं यत् संस्कृतं न केवलं वैज्ञानिकी भाषा एव, प्रत्युत औषधं वर्तते। सारस्वतातिथिभिः डा. कामदेवझाभिः भारतीयं नारीगौरवं चित्रितं, चरित्रनिर्माणं च प्रति छात्राः उद्बोधिताः। तैः आचार्यरमाकान्तशुक्लं प्रति विरचितात् प्रशस्तिगीतात् कानिचन पद्यान्यपि श्रावितानि, तत्प्रशस्तिपत्रं च आचार्यरमाकान्तशुक्लाय समर्पितम्। कार्यक्रमस्य अध्यक्षेण आचार्यरमाकान्तशुक्लेन देववाणीपरिषदा सह युगपुरुषस्य दिवङ्गतस्य कवेः अटलबिहारिवाजपेयिनः सम्बन्धचर्चापूर्वकं परिषत्पक्षतः तस्मै श्रद्धाञ्जलिरर्पितः। तेन संस्कृतदिवसम् अधिकृत्य प्रोक्तं यत् संस्कृताध्ययनशालिनां तु प्रतिदिनमेव संस्कृतदिनं भवति। तत्रत्यहिन्दीविभागस्य आचार्येण डा. सुरेशचन्द्रशर्मणा उक्तं यत् न केवलं हिन्दी एव अस्माकं मातृभाषा, प्रत्युत संस्कृतमपि अस्माकं मातृभाषा यतो हि हिन्दीभाषाया अपि माता संस्कृतं भवति। एतदतिरिच्य श्लोकपाठः, काव्यपाठः, नाट्यांशप्रस्तुतिः इत्यादीनि नैकानि अनुष्ठानानि अनुष्ठितानि। अन्ते आचार्यरमाकान्तशुक्लवर्येण स्वमेघगम्भीरघोषेण भाति मे भारतम् इति गीतं गीतं, सर्वैश्च तेन सह कृतं तस्य ध्रुवपदगानम्। कार्यक्रमे श्रीमती सुकेशशर्मा, रेखाव्यासः, डा. अङ्कुरत्यागी, डा. राजेशकुमारः, डा. श्रुतिशर्मा चेत्याद्यो विद्वांसः उपस्थिता अभूवन्। कार्यक्रमस्यान्ते धन्यवादज्ञापनं शान्तिपाठं च तत्रत्यसंस्कृतविभागाध्यक्षः डा. सत्यकामशर्मा व्यदधात्। संचालनं च परिषन्महासचिवेन ऋषिराजपाठकेन अकारि।





# ‘व्याकरणपरिषदः सङ्घटनम्’

**-दीपकवात्स्यः**

जयपुरम्। राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरस्थव्याकरणविभागेन 30/08/2018(गुरुवासरे) इति दिनाङ्के 2018-19 इति सत्रस्य कृते ‘व्याकरणपरिषद्’ इत्यभिधेया एका समितिः सङ्घटिता ।अस्याः परिषदः संरक्षकाः संस्थाप्रधानभूताः संस्कृतजगतः शिरोमणयः प्राचार्याः प्रो.अर्कनाथचौधरिवर्याः वर्तन्ते । तेषां संरक्षणेन व्याकरणविभागाध्यक्षैः

**‘छात्राधिकारिणः’**

1.अध्यक्षः-दीपककुमारचौधरी(दीपकवात्स्यः)
2.उपाध्यक्षः-आशीषशर्मा
3.सचिवः- जया साहुः
4.सहसचिवः- अन्तरिक्ष अग्रवालः
5.संयोजकः- पङ्कजसैनी

11.प्रियमदाधीचः
12.एकलव्यः
13.कृतिशर्मा
14.मेघनागौतमः
15.दौलतरामसैनी

व्याकरणपरिषदः सङ्घटनावसरे परिसरप्राचार्याः प्रो.अर्कनाथवर्याः




प्रो.शिवकान्तझावर्यैः व्याकरणविभागस्थानामाचार्याणां छात्राणाञ्चोपस्थितौ सभैकाहूता । तस्यां सभायां ‘व्याकरणपरिषद्’ इति समित्याः अध्यापकपदाधिकारिणां चयनं विहितम् तदथ पदाधिकारिभिः प्राक्शास्त्रिप्रथमवर्षत आरभ्य आचार्यद्वितीयवर्षं यावत् प्रतिकक्षं सर्वाधिकाङ्कान् प्राप्तवतां त्रयाणां छात्राणां छात्राधिकारिरूपेण चयनं विहितम् ।

व्याकरणपरिषदोऽधिकारिणां नामानि अधोनिर्दिष्टानि वर्तन्ते -

**‘अध्यापकपदाधिकारिणः’**

1.संरक्षकाः- प्रो.अर्कनाथचौधरिवर्याः(प्राचार्याः)
2.अध्यक्षाः-प्रो.शिवकान्तझाः (व्याकरणविभागाध्यक्षाः)
3.उपाध्यक्षाः-
प्रो.श्रीधरमिश्रवर्याः(शास्त्रभूषणपुरस्कारसम्मानिताः)
प्रो.कमलचन्द्रयोगिवर्याः
4.सचिवाः- डॉ.विष्णुकान्तपाण्डेयवर्याः (राष्ट्रपतिसम्मानिताः)
5.संयोजकाः- डॉ.पंकजपुरोहितमहोदयाः
6.संयोजिकाः- डॉ.साधनाशर्ममहोदयाः

6.सञ्चालकः-धीरजकुमारचौधरी(धीरजशास्त्री)
7.कोषाध्यक्षौ-
हीरालालकुमावतः
आशीषवैष्णवः

**‘व्याकरणपरिषदः सदस्याः’**

1.कोमलकौशिकः
2.
3.चन्द्रकान्ताशर्मा
4.ज्योतिः
5.गोविन्दजांगिड़ः
6.निधिमाथुरः
7.दिनेशकुमारः
8.एकताशर्मा
9.चन्द्रकान्तयादवः
10.राजेशकुमारलोधा

अवोचन् यद् यथा षट्सु शास्त्रेषु ‘मुखं व्याकरणं स्मृतम्’ अर्थात् मुख्यं प्रधानीभूतम्भवति तथैवास्य परिसरस्य व्याकरणविभागः प्रधानभूतोस्थ च प्राणभूतो वर्तते ।अत्र सर्वेषां परिसराणामपेक्षया देशे-विदेशेषु ख्यातिलब्धाः सर्वाधिकाः प्राध्यापकाः वर्तन्ते ।

अतः व्याकरणविभागस्थानां प्राध्यापकानां छात्राणाञ्चाधिकं दायित्वं वर्तते यतो व्याकरणविभागः श्रेष्ठो विभागो वर्तते । व्याकरणपरिषदः सदस्यानां पुष्पमाल्येन स्वागतं स्वाशीर्वाग्भिरभिनन्दनम् अन्ते प्रतिज्ञानञ्च (शपथः) कारितवन्तः ।

प्रो.श्रीधरमिश्रमहोदयाः अवोचन् यत् अस्मच्छात्रा एव अस्मद्गौरवम् । यतोहि छात्रा एव विविधशास्त्रेषु नैपुण्यं सम्पाद्य आत्मनः गुरूणाञ्च कीर्तिं ख्यापयन्ति । भवन्तोऽपि गुरून् शास्त्रं संस्थाञ्च प्रति श्रद्धावन्तः सन्तः श्रियमवाप्नुयुरिति शुभकामनाः आशिषश्च ।

व्याकरणविभागाध्यक्षाः प्रो.शिवकान्तझावर्याः अब्रूवन् यत् अस्मद्विभागस्य छात्राः व्याकरणपरिषदा आयोजितेषु अनेकेषु कार्यक्रमेषु अहमहमिकतया भागं संगृह्य समग्रेऽपि देशे राजस्तरीयस्पर्धासु राष्ट्रस्तरीयस्पर्धासु च सफलाः सन्तः प्रशासनिकसेवासु सर्वकारीयसेवासु च कार्यङ्कुर्वाणा वर्तन्ते ।एतद्वर्तते अस्याः परिषदः अत्रत्यानां प्राध्यापकानां वैशिष्ट्यम् । भवन्तोऽपि अस्यां परिषदि सहयोगं कुर्वन्तः उत्कृष्टं पदमलङ्कुर्युरिति अस्माकं शुभकामनाः आशिषश्च ।

डॉ.विष्णुकान्तपाण्डेयवर्यैः व्याकरणपरिषदः परिचयेन सह परिषदः महत्त्वं वैशिष्ट्यं दायित्वं कर्तव्यञ्च प्रतिपादितानि ।

प्रो.कमलचन्द्रयोगिवर्याः स्ववाचा परिषदः सदस्यान् अभिनन्द्य व्याकरणशास्त्रस्य महत्त्वम् उपादेयताञ्च प्रतिपाद्य धन्यवादज्ञापनं अकुर्वन् ।

कालेऽस्मिन् छात्राणां पक्षतोऽपि अनेकाः प्रस्तुतयः प्रस्तुताः- संस्कृतगीतम् ,अनुभवकथनम् इति प्रभृतयः ।अस्य कार्यक्रमस्य संयोजनं व्याकरणपरिषदः अध्यक्षेण दीपककुमारचौधरिणा (दीपकवात्स्येन) प्राचार्याणां प्राध्यापकानां सभासदाञ्च वाचिकं स्वागतं पद्यैरनेकैः कृतम् तथा व्याकरणपरिषदः समेषां सदस्यानामभिवन्दनञ्च विहितम् । मञ्चसञ्चालनं धीरजकुमारचौधरिणा(धीरजशास्त्रिणा) अतीव उत्कृष्टतया विहितम्। अन्ते सामूहिकचित्रेण आचार्याणामनुमत्या शान्तिपाठेन च सभेयं समाप्तिं गता ।

**जयतु संस्कृतम् जयतु भारतम् ।**
**जानातु संस्कृतं जानातु भारतम् ।**
**संस्कृतं भारतं समर्थभारतम् ।।**

# अर्वाचीनसंस्कृतसर्वस्वं लोकायार्पितम्

बिरला पब्लिक स्कूल, पिलानी(राज.)इत्यत्र 25.08.2018 तमे दिनांके डा.अभिनवशुक्ल-ग्रथितम् ‘अर्वाचीनसंस्कृतसर्वस्वं’ नाम पुस्तकं तत्रत्येन प्राचार्येण श्रीमता से.नि.कर्नल आलोकेश सेन महाभागेन लोकायार्पितम्। अस्मिन्नवसरे ‘देववाणीपरिषद्, दिल्ली’ ति संस्थायाः संरक्षिका श्रीमती रमा शुक्ला,अध्यक्षः डा.रमाकान्तशुक्लः,महासचिवः डा.ऋषिराजः पाठकः कार्यसमितिसदस्यश्च डा.चन्द्रभूषण झा उपस्थिता आसन्।एतैः सर्वैरन्यैश्च विद्वद्भिः ग्रन्थकर्ता वर्धापितः।

स्मरणीयं विद्यते यदुक्तपुस्तकं देववाणीपरिषदा 139तमग्रन्थरूपेण2018तमे वर्षे प्रकाशितं यस्मिन् ‘अर्वाचीनसंस्कृतम्’इत्येतस्य त्रैमासिकपत्रस्य चत्वारिंशद्वर्षेषु प्रकाशिताया: सामग्र्याः सूची कालक्रमेण प्रदत्ता।परिशिष्टे काश्चन रचना अप्युद्धृताः।



खादी वस्त्र ही नहीं, विचार है !
आदर्श ग्रामोद्योग समिति, दिल्ली
खादी वस्त्रों का विशाल भण्डार
✪ सूती खादी व रेडीमेड ✪ ऊनी खादी व कम्बल (रेडीमेड) ✪ रेशम साड़ी (रिल्ड)
✪ रेशम स्पन व रेडीमेड ✪ पोली खादी
सभी प्रकार की खादी व ग्रामोद्योग उत्पाद जैसे अचार, साबुन, तेल, शैम्पू, शहद,अगरबत्ती, च्यवनप्राश, त्रिफला आदि के लिये पधारें।
खादी ग्रामोद्योग भवन
✪ 10/105-A, सेक्टर-3, राजेन्द्र नगर, साहिबाबाद, (उ0 प्र0)
✪ शेरपुर चौक, करावल नगर, दिल्ली-110094
फोनः-0120-2631855, 9899334204

# सम्पादकीयम्

संस्कृतानुरागिणो बन्धवः!

सामोदं नमोनमः।

विलसति सुरभारती प्रतिनगरं साम्प्रतमिति विलोक्य मोदतेऽन्तःकरणं न कस्य भारतीयस्येति। गतदिवसेषु सम्पूर्णेऽपि भारते संस्कृतसप्ताहस्य समायोजनं प्रमाणयति यत् संस्कृतदिनं पुनरागतमस्मिन् देशे मुनीनामिति। सज्जनाः! देशस्य विश्वविद्यालयेषु सस्कृतसंस्थानेषु महाविद्यालयेषु विद्यालयेषु प्राथमिकपाठशालासु संस्कृतस्य ध्वनिः सर्वैरपि श्रुतः, महानामोदोऽमोदो हृदि उदतिष्ठदिति सर्वमपि संस्कृतविषयकमायोजनमवलोक्य। हरियाणाराज्ये भारतववर्षस्य सप्तदशसंस्कृतविश्वविद्यालयस्य संस्थापनं तत्र विदुषः डॉश्रेयांसद्विवेदिमहोदयानां कुलपतित्वं सर्वमेतत् संस्कृतनवयुगारम्भो मन्यताम्। विशिष्टं विज्ञापनीयमिदमस्ति यत् यादृश उत्साहः संस्कृतज्ञेषु समवलोक्यत स तु एवमेव बोधयति यत् पुनरेकरयं देशो विश्वगुरुपदवीमारूढो भवितेत्यत्र नास्ति संशयः। भारतस्यास्माकं प्रतिकोणं संस्कृतप्रचारः, संस्कृतसंगोष्ठ्यः, संस्कृतकविसमवायः, संस्कृतनाटकाभिमंचनम्, संस्कृतगीतायोजनम्, संस्कृतचित्रवीथिकाप्रदर्शनम् इति विश्वव्यापि समायोजनं संस्कृतभाषायः समागमं दर्शयति। ऋषिमुनिजनानां देशेऽस्मिन् सोल्लासं सुजनैः संस्कृतशोभायात्रा प्रबोधयति यत् पुनः शुकाः सारिकाः संस्कृतगानं करिष्यन्ति। सोशलमिडियासु सर्वाधिकः संस्कृतप्रचारो विहितः। नवयुवकाः सुकवयः, प्रौढैः सुकविभिस्साकमुनदिनं संस्कृतगुंजनमकुर्वन्।

महाकविरभिराजराजेन्द्रमिश्रमहोदयस्य सत्प्रेरणया शुभाशिषाधुना देशे अगणिता नवयुवानः सुरभारतीकवित्वं भजन्त इति प्रमोदकरं वृत्तं गुंजति गगनमण्डले। महाकविः इच्छारामद्विवेदी प्रणवः फेसबुके नवकवीनुत्साहयितुं सर्वदैव जागरितोऽदृश्यत दृश्यत इति संस्कृतसमाजस्य सौभाग्यम्। महामहोपाध्यायः रमाकान्तशुक्लमहोदयः निजलेखन्या वार्धक्येऽपि काले नवयुवेव प्रतिदिनं संस्कृतानुरागरक्तानस्मान् निबोधयन्ति काव्येन वचसेति स्मृत्वा मोमुद्यते चेतः। संस्कृतसप्ताहमभिलक्ष्य संस्कृतं भारतं समूहे राष्ट्रियकविसम्मेलनं विश्वकुटुम्बकसमूहे वेदमन्त्रपाठस्पर्द्धाः अन्येषु च समूहेषु विविधकार्यक्रमाणामायोजनं संस्कृतस्य सुदिनमेव ज्ञापयति।

मान्याः! मनकीबातइति कार्यक्रमे माननीयप्रधानमन्त्रिणा श्रीमता नरेन्द्रमोदिना संस्कृतस्य विषये बहु प्रोक्तं सुखदं वचनमस्मान् संस्कृतान् सुखयति। देशस्य नेतृषु संस्कृते शपथग्रहणमपि संस्कृतस्य महत्त्वं सूचयति। ध्वनिथिरैपी चिकित्साक्षेत्रे वर्धमाना वर्तते, यत्र संस्कृतध्वनिना वेदमन्त्रात्मकेन विविधा रोगाः प्रशमं यान्तीति संश्रूयमाणमस्ति। हन्त! सर्वत्र संस्कृतरवो गुंजेत्, बालो वृद्धो गृहिणी भारवाहः शाकविक्रेतारो रिक्साचालकाः,कृषकाः, श्रमिकाः संस्कृतभाषां वदन्तु इति कामयमाना सादरम् अमरवाणी विजयतामिति ब्रुवाणा निजलेखनीं विरमयामि।

## वेदामृतम्

**( ऋग्वेदभाष्यम् )**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

**नराशंसमिह प्रियमुस्मिन् यज्ञ उप ह्वये।**
**मधुजिह्वं हविष्कृतम॥३॥**

अर्थ-जो भौतिक अग्नि इस संसार में होम के निमित्त यक्ति से ग्रहण किया हुआ प्राणियों की प्रसन्नता करानेवाला है, उस अग्नि की सात जीभे हैं, अर्थात् कालीख्रजोकि सुपेद आदि रङ्ग का प्रकाश करनेवाली, कराली-सहने में कठिन, मनोजवा-मन के समान वेगवाली, सुलोहिता-जिसका उत्तम रक्तवर्ण है, सुधूम्रवर्णा- जिसका सुन्दर धुमलासा वर्ण है, स्फुल्लिङ्गनी-जिससे बहुत से चिनगे उठते हों तथा विश्वरूपी-जिसका सब रूप हैं। ये देवी, अर्थात् अतिशय करके प्रकाशमान और लेलायमाना-प्रकाश से सब जगह जानेवाली सात प्रकार की जिह्वा हैं, अर्थात् सब पदार्थों को ग्रहण करनेवाली होती है। इस उक्त सातं प्रकार की अग्नि की जीभों से सब पदार्थों में मनुष्यों को उपकार लेना चाहिए।।३।।

उक्त अग्नि इस प्रकार उपकार में लिया हुआ जिसका हेतु होता है, सो उपदेश अगले मन्त्र में किया है-

# प्रसन्नभारतमिति महाकाव्ये ग्रामसंस्कृतिः

**–डॉ नवलता**
अध्यक्षा संस्कष्तविभागः
विक्रमाजीतसिंह सनातनधर्ममहाविद्यालयः, कानपुरम्

भारतं ग्रामप्रधानो देश इति गीयते। अद्याप्यत्रत्याशीतिप्रतिशतं जनसंख्या ग्रामेषु वसति। पाश्चात्यप्रभावेण नवनवाधुनिकविचित्रवेशभूषाया गष्हाभ्यन्तरमांग्लसभ्यताप्रदर्शकभाषाप्रयोगेण तादष्वासविधिं च स्वीकुर्वाणाः चाकचक्यमेवाधुनिकतायाः पर्यायं मन्यमानाः तथाभूता आधुनिकम्मन्याः नागरिकाः ग्रामः कश्चिन्निरक्षराणामाधुनिकैः सह व्यवहारेऽकुशलानां पष्ठजीवनपरायणानां विपन्नानां कषषिमात्रैकवृत्तीनां मलिनजनानां वसतिरिति भावयन्ति। किन्तु विस्मरन्त्येते यद्भारतस्यात्मा खलु ग्रामे वसति। अन्नार्थं सर्वेऽपि नागरिकाः ग्रामृेवेवाश्रिताः। कृषिप्रधाने भारते ग्रामा अन्नदातार इति वक्तुं शक्यते। अथ च भारतीयसंस्कृतेराधारभूता एते। किं बहुना भारतीयसंस्कृतेः विकासो ग्रामृेवेवाभूदिति ध्रुवसत्यम्।

वैदिकसंस्कृतौ लोकवसतीनां रूपद्वयमुल्लिखितं वर्तते ग्रामश्चारण्यकश्च। तत्राश्रमविभागादारण्यकवसतिषु तपोवनानि गुरुकुलानि चेति ख्यातानि यत्र ब्रह्मचारिणः वानप्रस्थाः संन्यासिनश्च निवासं कुर्वन्तिस्म। ग्रामेषु च सामान्यतो गृहस्थानां निवासः प्रशस्तः। सर्वाश्रम इति पदेनैव निश्छलाकृत्रिमसरलसहजजीवनपद्धतेः चित्रं नरीनृत्यति नेत्रयोः सम्मुखे। उक्तो हि गृहस्थः सर्वाश्रमाश्रय इति। मित्रभावेन केषांचित्कुटुम्बानां समूहो वसति यत्र सा वसतिः ग्राम इत्यभिधीयते। परस्परं सहयोगभावनया ब्राह्मणक्षत्रियवैश्यशूद्राणां समसंयोजनेन विभाविता वर्णव्यवस्था जीवनयापनार्थं कृषिः गोपालनमुपवनोद्यानप्रकल्पनं ग्रामगुरुकुलं जीविकोपयोगिनः कुटीरोद्योगाः इत्यादिभिः सुनियोजितानां ग्रामाणां सङ्कल्पना भारतीयसंस्कष्तेः कश्चिदादर्श इति वक्तुं शक्यते।

अद्यतः पञ्चाशद्वर्शेभ्यः पूर्वपर्यन्तमस्माकं भारतीयग्रामेषु यन्निश्छलभावः या परोपकारिता योदारता यदकृत्रिमं जीवनं यन्निकारणमात्मीयभावः यद्वृक्षपादपानां हरीतिमा यच्छीतलमन्दसुगन्धपवनोल्लासः दृश्यते स्म नाधुना तदुपलभ्यते ग्रामेषु। गोमयलिप्तानि मष्द्भित्तीनि गष्हाणि तत्र च गष्हेषु पेषिणीनां घर्घरध्वनिः पर्वोत्सवेषु सामूहिकोल्लासः श्रावणे विशालतरेषु छायावृक्षेषु लम्बितायां दोलायां दोलन्तीनां ग्रामवधूनां बालिकानां च हास–परिहासस्वरः मनोहराणां सामयिकलोकगीतानां मधुरस्वरः कदाचित्कस्यापि परिवारस्य विपन्नावस्थावयां सर्वैः कुटुम्बसदस्यैः सर्वविधसाहाय्यं कस्याप्येकस्य पुत्र्या सह सम्पूर्णस्य ग्रामस्य पुत्रीवद्व्यवहार इत्येतदासीद्ग्रामस्य चित्रम्। किन्त्वद्य न तथा दृश्यते।

इदानीन्तु नगराणामपसंस्कृतेः प्रभावो ग्रामेष्वपि दृश्यते। नेदानीं ग्रामेषु मृद्गृहाणि बहुलायन्तेऽपितु लोकानां रुचिः पक्वेष्टिकानिर्मितेषु गुहेषु वर्धमाना दृश्यते। क्षेत्रेषु गोकृष्टा कृषिः नाधुना दृश्यते ग्रामृेवपितु ट्रैक्टरकृष्टायाः कृषेराधिक्यं वर्तते तत्र। ग्रामपाठशालासु शिक्षकानामनुशासनं पाठविधिश्चेदानीं ग्रामवासिभ्यो न रोचते। विकासस्य नागरिकी सङ्कल्पना ग्रामृेवपि सन्निविष्टा। ग्रामनगरयोः सांस्कृतिकमन्तरं हीयमानमिव। अपरमुखेन वक्तुं शक्यते यद्ग्रामाणां नगरीकरणे सर्वकारस्याथ च लोकानामपि अभिनिवेशो जायते। नैतद्भारतीयसंस्कृतेः संरक्षणस्योज्ज्वलपक्षः।

मनीषिणः कवयः रचनाकाराश्च ग्रामसंस्कृतेः संरक्षणे तन्महत्त्वप्रतिपादने च रचनामाध्यमेन स्व–स्वदायित्वं निर्वहन्तः सन्ति। स्मर्यते मया बाल्यकाले पाठ्यपुस्तके पठितैका कविता "अहा ग्राम्यजीवन भी क्या है! क्यों न इसे सबका मन चाहे" इत्यादि। संस्कृतरचनाकारा अपि ग्रामजीवनस्य चित्रणं बहुशः कष्तवन्तः। वैदिककालीना संस्कृतिः ग्रामसंस्कृतिरासीदिति जानन्त्येव विद्वांसः। लौकिकसाहित्यस्यादिप्रणेता महर्षिर्वाल्मीकिः रामायणे आरण्यकग्रामसंस्कृत्योः चित्रणं स्वाभाविकरूपेण कृतवान्। महाकविः कालिदासोऽपि स्वस्मिन्महाकाव्येषु खण्डकाव्ययोश्च प्रसंगतः ग्रामवर्णनं कृतवान्। महाराजदिलीपस्य यात्रायां **"हैयङ्गवीनमादाय ग्रामवृद्धानुपस्थितान्"**[1] इत्यादिवर्णनेन ग्रामीणानामातिथ्यप्रथा प्रकटीभवति। परवर्तिसंस्कष्तकाव्येऽपि यत्र तत्र सर्वत्र ग्रमाणां तत्संस्कष्तेश्च परिचयः प्राप्यते। आधुनिकसंस्कृतसाहित्येऽपि भारतीयग्रामसंस्कृतिः प्रतिबिम्बिता परिलक्ष्यते।

अस्तु। तत्रोत्तरप्रदेशे सीतापुरजनपदे बिसॅवेति ग्रामे लब्धजनिराचार्यो गिरिजाशंकरमिश्रः प्रसन्नभारतमिति स्वीये पञ्चदशसर्गात्मके महाकाव्ये अन्यतमं द्वादशं सर्गं ग्रामेभ्यः समर्पितवान्। स तु ग्रामं भारतस्य प्राणभूतं भारतस्यात्माश्रयीभूतं च मन्यते। द्रष्टव्यमत्र–

**प्रसिद्धविद्यागुरुभारतस्य प्राणायिता चारुचरित्रपूता।**
**अन्नप्रदातुर्धरणीसुतस्य वासस्थली ग्रामधराऽस्मदीया।।**[2]

ग्रामस्तु भारतात्मनः आश्रयभूत इति मत्वा महाकविः तत्र यद्धेतुं वक्ति तदत्यन्तं मार्मिकः।

को न जानातीदानीमस्माकं भारतीयसंस्कष्तौ पाश्चात्यसभ्यतायाः प्रभावं तस्य दुष्परिणामं च। पूर्वकाले या संस्कषतिः भारतस्य नगरेष्वप्यासीद्यत्सौमनस्यमकृत्रिमं जीवनं यश्च सौहार्दभावः लोकेषु आसन् परोपकारितादिगुणाश्च नागरिकेषु तेषां सांस्कृतिकगौरवस्याभिज्ञानमिवासन्न त इदानीं नगरेषु दृश्यन्ते। चाकचक्यपूर्णा कृत्रिमजीवनशैली अशालीनवेशभूषा परकीया भाषा अशिष्टाचरणं स्वार्थपरतेत्यादिदुर्गुणाः यथा नगरेषु व्याप्ताः सन्ति ते भारतस्यात्मभूतायाः संस्कृतेः स्वरूपं न निर्धारयन्ति। कविः कल्पनां करोति यदेतेभ्यो दो षेभ्यः पीडितो भारतस्यात्मा दुःखतप्तः स्वधर्मसंस्काररक्षार्थमिदानीं ग्राममाश्रितः। अवलोक्यताम्–

**पाश्चात्यशिक्षाप्रसरत्प्रभावातः स्वधर्मसंस्कारकश्भात्वदोशतः।**
**महाशुचा पीडितभारतात्मा लब्धाश्रयो यापयतीह कालम्।।**[3]

अभिप्रायः खल्वयं यदिदानीमपि ग्रामेषु भारतीयसंस्कृतिः जीवन्ती दृश्यते। मिश्रवर्याः ग्रामाणां चित्रणे स्वयमेवैकैकं विषयं श्लोकानां समक्षं निर्दिश्य पाठकानां समीक्षकाणां च कार्यं सरलीकृतवान्। तत्र वृक्षाः समीरः कृषिसेचनं क्षेत्रकर्षणं नृत्यविशेषं नौटंकीति ग्रामेषु ख्याता शशकगवयाः आम्रपुष्पोद्गमः गृहाणि क्षेत्रस्थितिः व्यायामशालेत्यादीनां सजीवचित्रणमिव कृतं वर्ततेऽत्र। तांस्तान् विषयानधिकृत्य कृतेषु वर्णनेषु ये विषयाः समुपस्थापिताः तेषां वर्गीकरणमधोनिर्दिष्टशीर्षकेषु कर्तुं शक्यते।

**ग्रामस्य भौतिकं स्वरूपं पर्यावरणं च–**

नगरेष्वद्य यथा प्रदूषणमवलोक्यते तथा ग्रामेषु नास्ति।

यतोहि तत्र कपित्थजम्बूबदरीरसालमधूकचिंचातिलकादिनानास–रसफलप्रदायकाः वष्क्षाः प्रकृत्याः प्रसादं ग्रामवासिभ्यो वितरन्त इव लक्ष्यन्ते।[4] एतेषां वष्क्षाणामथ च सरःसून्मीलितानां पंकजानां गन्धं दधानः तापहरो पवनः वाति। सर्वतो हरीतिमायुक्तेषु ग्रामेषु प्रवेशमात्रेण चागन्तुकानां मनांसि प्रफुल्लितानि भवन्ति।[55]

**उन्निद्रपङ् केरुहगन्धवाही तापापनोदी सरसमीरः।**
**यत्र स्वपादं दधतां नराणां चेतांसि सद्यः सरसीकरोति।।**

गृहाणां द्वारि पुष्पफलवल्ल्यादिवन्तो लतापादपाः वातावरणं शुद्धं स्थापयन्ति। सवत्सा गावः तृणभित्तिवन्तश्च छादाः छप्पर इति किमप्यनुष्णं प्रीतिकरमानन्दं प्रददति।[6] गोमयलेपरम्याणि गृहद्वाराणि प्राङ्गणानि गवां चर्वितचर्वणानि जुगालीति क्रीडनतत्पराणां बालवृन्दाणां कोलाहलः[7] रात्रौ वधूभिः गृहस्य मध्यभागे रोपितस्य तुलसीपादपस्याधः भक्तिभावेन दीपं प्रज्ज्वाल्य नमनं न केवलं मनांसि हरत्यपितु गृहं शुद्धमपि करोति।[8] उल्लेखनीयं यद्गोमयं जीवाणुहरं भवति। यत्र–यत्र गोमयलेपो भवति तत्र–तत्र जीवाणवो न भवन्ति। अथ तुलसीपादपोऽहर्निशं प्राणवायुं ऑक्सीजन इति निःश्वसिति। दीपप्रज्ज्वालनेन तस्य संवर्द्धनं भवति। प्रायेण गृहद्वारेषु लताप्रतानानामाश्रयभूता फलवष्क्षा अपि रोप्यन्ते येभ्यो फलान्येव नापितु शुद्धपवनमातपत्रमिव छायामपि प्रयच्छन्ति।[9] ग्राम आपरोपितानाम्मधूकानां गन्धः प्रासादवासिनीनां नारीणां भालेषु चर्चितानां तिलकानां गन्धमप्यतिशेते।[10] एवं ग्रामेष्वद्यापि नगराणामपेक्षया प्राकृतिकं शुद्धं निर्दुष्टं वातावरणं पर्यावरणं च द्रष्टुं शक्यते।

**शेषभागः आगामीअंके**

**(Footnotes)**

[1] रघुवंशम्

[2] प्रसन्न भारतम् 12/1

[3] तदेव 12/2

[4] प्रसन्न भारतम् 12/3 तदेव–12/4

[6] स्पुष्पवल्लीविकसद्वितानैः संवेष्टिता लम्बितसत्फलाश्च।
द्वारस्थनिद्रालुसधेनुवत्सा
लसन्तिगेहास्तष्णभित्तिवन्तः।। तदेव– 12/13

[7] तदेव 12/15

[8] तदेव– 12/18

[9] लताप्रतानाश्रयनम्रमस्तकैनदत्पतंगावलिमंजुघोषिभिः।
फलद्रुमैस्तर्पितलोकलोचनैर्धृतापतपत्रैरिव यत्र भूयते।।

[10] तदेव– 12/40

# विश्वसंस्कृतदिवसस्योपलक्ष्ये वृक्षारोपेणन पर्यावरणसंरक्षणम्

जम्मु। विश्व संस्कृत दिवस एवं श्रावणी पूर्णिमायां श्री केलखज्योतिष एवं वैदिक संस्थान ट्रस्ट माध्यमेन संस्कृत



समारोहस्यायोजनमभवत्। एषु आधुनिक युवकान् संस्कृत संवर्धन एवं संरक्षण हेतु आहवाहन कृतवान। अस्य संस्थाया अध्यक्ष महंत रोहित शास्त्री ज्योतिषाचार्यः अभिभावकान् संम्बोधनं कृत्वा उक्तवान यत् सर्वे स्व बालकान् संस्कृत अध्ययनाय प्रेरयन्तु येन संस्कृते निहीत वैज्ञानिक ज्ञानेन समाजस्य कल्याणं भविष्यति। अतः युवकाः संस्कृतस्य मनीषि कवि रचनया परिचितं भवेत्। अस्यावसरे वृक्षारोपणमपि कृतवान।

रोहित शास्त्री उक्तवान यत् 1969 तमे वर्षे भारत सर्वकारस्य शिक्षा मंत्रालयस्य आदेशेन इदानीं पर्यन्तं केन्द्र एवं राज्य स्तरे संस्कृत दिवसस्यायोजनं भवति। श्रावणी पूर्णिमायामेव प्राचीन भारते शिक्षणस्य सत्रारम्यः भवति स्म। एवं पौष मासतः श्रावणि पूर्णिमा पर्यन्तं अध्ययनं न प्रचसति स्म इदानीमपि गुरूकुले एतादृशं नियमोऽस्ति। अधुना केवलं देशे न अपितु विदेशेऽपि संस्कृत दिवसस्यायोजनमपि उत्साहेन प्रचलति।

राज्य व जिला स्तरे संस्कृत दिवसस्यायोजनं भवति। अस्मिन्नवसरे संस्कृत कवि सम्मेलनं, लेखक गेष्ठी, भाषण, श्लोकोच्चारण इत्यादि प्रतियोगितायाः आयोजनं भवति। येन संस्कृतज्ञान् समुचित मंच प्राप्तं भवति।

## ब्रिटिश कोलंवियायाः विद्वांसः निर्माति संस्कृतविश्वविद्यालयस्य पाठ्यक्रमम्

पंकज आत्रेय, कैथलः

मूंदड़ी ग्रामं निर्मानाधीन महर्षि वाल्मीकि संस्कृत विश्वविद्यालयस्य पाठ्यक्रमे सम्पूर्ण देशस्य विद्वान्सः संलग्नाः सन्ति। ब्रिटिश कोलंबिया विश्वविद्यालयस्य प्रो. डॉ. जार्ज कर्डोना एवं डॉ. अशोक अखजुलकर अपि अस्मिन् कर्ये संलग्नौ स्तः। संस्कृत विश्वविद्यालस्य नवनिर्मित कुलपति डॉ श्रयांशद्विवेदी सूचना प्रदत्तम् तेनोक्तं यत् अयं विश्वविद्यालयः पारंपरिक पाठ्यक्रमं परित्यज्य कार्य करिष्यति।



नूतन स्वरूप प्रदानाय जे.ए.यु. एवं दि.वि.विद्यालयस्य संस्कृत विभागाध्यक्षेन् सह श.सं.संस्थानम् एवं महाराष्ट्रस्य रामटेक स्थित संस्कृत विश्वविद्यालयस्याचार्य पाठ्यक्रमस्य निर्माणं कुर्वन्ति। डॉ. श्रेयांशः अस्य विश्वविद्यालयस्य स्थापनायै सामाजिक न्याय एवं अधिकारिता राज्यमंत्री कृष्णदेवी आधारशीला उक्तवान। उक्तं यत् तेषां प्रस्तावं मुख्यमंत्री मनोहरलालः प्रस्तावितं कृत्वा प्रशंसा कृतवान। ते विद्यायक डॉ पवन सैनी महोदयस्यापि धन्यवाद ज्ञापितवान।

डॉ. द्विवेदी उक्तवान यत् काव्यशाला, नाट्यशास्त्र, गद्यशास्त्र एवं विषयेषु नवीनतायाः आवश्यकताऽस्ति। अहं प्रत्येकस्मिन सत्रे नूतनतया पाठयामि। तद्वदेव शिक्षा पद्धति प्रचलिष्यति यस्याः इदानींतन समये आवश्यकताऽस्ति। ते उक्तं यत् ये विद्यार्थिनः अस्मिन् विश्वविद्यालये पठिष्यन्ति तेषां भविष्यं उज्ज्वलितो भविष्यन्ति। भित्तेः नाम संस्था न भवति। संस्था भवति विचारधारा। पाठयक्रमे नवीनता आगमिष्यति। तत् नेट, जे.आर.एफ इत्याधारित भविष्यति।

## स्मृतिशेषः भारतरत्नं महात्मा अटलबिहारी वाजपेयी

विगतदिवसेषु भारतवर्षस्य रत्नं महामना महात्मा अटलविहारी वाजपेयी महोदयः इहलोकं त्यक्त्वा देवलोकं गतः। भारतवर्षस्यायमप्रतिमो नेता अद्वितीय आसीत्। अस्य भाषणानि अस्य गीतानि अस्य देशसेवाश्च सर्वमपि चिरस्मरणीयं वर्तते। संस्कृतसंवादपरिवारपक्षतः श्रद्धांजलिर्दीयते।



मान्याः! श्रीमान् अटलविहारी वाजपेयी महोदयः भारतवर्षस्यैव नापितु विश्वस्य महत्तमो मार्गदर्शको नेता आसीत्। अस्य महानुभावस्य विशालं व्यक्तित्वं सम्प्रेक्ष्यैव बहुभ्योऽपि देशेभ्यः महनीया जनाः प्रतिनिधयो नेतारो श्रद्धांजलिं दत्तवन्तः। हन्त! दिव्या भारतीया धरा या एवं प्रज्ञापुरुषं सूते। भारतरत्नालंकारभूतः जननायकोऽयमाजीवनं भारतवर्षस्य सेवामकरोत्। देवपुरुष इवाटलो विहारी जनतापहारी आसीत्। अस्य वैदग्ध्यं वाक्चातुर्यं च ज्ञात्वैव जनता एनं प्रति श्रद्धावती अस्ति। भारतदेशस्य महापुरुषेषु अयं स्वर्णमसीलेखनयोग्यः प्रधानमन्त्री अभवत् इति जानन्ति सर्वे। अस्य महोदयस्य भाषणं श्रुत्वा विपक्षोऽपि एनं मुक्तकण्ठेन प्रशंसति स्मेति श्रूयते। संस्कृतभाषायाः प्रचारे प्रसारे राष्ट्रोन्नतये चैतेषामविस्मरणीयं कार्यं विलोक्य भारतीया वसुधा स्वर्गलोकं प्रयान्तमेन मत्वा क्रन्दतीवेति वक्तुं शक्यते। हन्त! एकस्य दिव्ययुगस्य महाप्रयाणं नूनमेवाद्य जातम्।

अस्तु भारतीयराजनीतिसूर्यः अस्तं गत इत्यपि भाषन्ते विज्ञाः। सत्यमेतत् अमरवाणीसेवकः महनीयः राजनेता जननेता भारतीयजनताप्राणभूतः सम्पूर्णमानवताया रक्षकः श्रीमान् अटलविहारी वाजपेयी महोदयः मृत्वापि जीवतीवेति न संशयः। कीर्तिर्यस्य स जीवति। अहं मन्ये अयं श्रान्तिमपनेतुं गतो वर्तते। अचिरमेव नूनं शरीरं धृत्वा नवबलेन नूतनविचारेण भारतसेवार्थमागमिष्यतीति भावयन्ती सादरं वन्दमानां श्रद्धांजलिततिं विनिवेदयामि।

# संस्कृतसंगोष्ठ्या श्लोकप्रतियोगितायाष्च आयोजनम्

मेरठ। 25 अगस्त 2018 महावीर आयुर्वेद महाविद्यालय मेरठ नगरे विश्व आयुर्वेद परिषद एवं संस्कृत भारती मेरठस्य तत्ववावधाने आयोजित हृदयावलि संस्कृत संगोष्ठी एवं श्लोक प्रतियोगितायाः आयोजनमकरोत्। कार्यक्रमस्य विशिष्टातिथि प्रो. प्रेमचन्द्र शास्त्री, उपाध्यक्ष, उत्तराखण्ड संस्कृत अकादमी आसन्। कार्यक्रमे आयोजित संस्कृत श्लोक प्रतियोगितायां विजेतृणां एमिल फार्मा एवं विश्व आयुर्वेद परिष्दस्य पक्षतः पुरस्कारं दत्तवान। कार्यक्रमे प्रो. वसन्त कुमार पराशर डॉ. दीपक इत्यनयोः मार्गदर्शन प्राप्तवान। अस्मिन आयोजने महावीर महाविद्यालयस्य उपनिदेशक श्रीदीपकशर्मा, संस्कृत भारती मेरठ प्रान्तस्य संगठन मंत्री श्री नरेन्द्र पाण्डेय, विश्वआयुर्वेद परिषदस्य प्रांत महामंत्री डॉ. चन्द्रचुड मिश्रा, महाविद्यालयस्य संस्कृतचार्य डॉ राजरानी, श्री रूपेश कुमार एवं अन्य जनाः स्व योगदानं प्रदत्तम। संचालनं डॉ. निधिशर्मा कृतवती।

अस्मिन्नवसरे संस्कृत वस्तु प्रदर्शिनी आकर्षणस्य केन्द्र आसीत्। श्रीराम आयुर्वेद महाविद्यालयस्य छात्राः संस्कृताचार्य डॉ. इश्वरशास्त्री महोदयस्य मार्गदर्शने सहभागिता गृहीतवन्तः।



अतः संसदा आपराधिक-विधि-संशोधन-विधेयकम् अभ्युपगम्य कठोरतम-दण्डः प्रावधत्तः। दुष्कर्मणः दोषिणः न्यूनान्यूनं दश-वर्षात्मक-दण्डेन दण्डयिष्यन्ते, तथा च, द्वादश-वर्षेभ्यो न्यूनायुष्मतीषु बालिकासु बलात्कारिणः मृत्युना दण्डयिष्यन्ते। कतिपयेभ्यो दिनेभ्यः प्राक् भवन्तो वार्तापत्रेषु पठितवन्तः स्युः यत् मध्यप्रदेशे मंदसौरे अन्यतमेन न्यायालयेन केवलं मास-द्वयावधौ एव वाद-श्रवणानन्तरं अवयस्क-बालिकायां बलादाचरणस्य दोषि-द्वयं मृत्युना दण्डितम् । एतत्-पूर्वं मध्यप्रदेशे कटनी-नगरे एकेन न्यायालयेन केवलं दिवस-पञ्चके वाद-श्रवणं कृत्वादोषिणो मृत्युना दण्डिताः। राजस्थानेह्यपि तत्रत्य-न्यायालयैः एतादृशाः त्वरित-निर्णयाः विहिताः। अयं विधिः महिलाः बालिकाश्च विरुद्धय विधीयमानानि अपराध-प्रकरणानि अवरोद्धुं प्रभाविनीं भूमिकां निर्वक्ष्यति। सामाजिक-परिवर्तनं विना आर्थिक-प्रगतिः अपूर्णा एवास्ति। लोकसभायां triple-तला ?-इति विवाह-विच्छेदक-विधेयकम् अभ्युपगतम्; यद्यपि राज्यसभायाः ऐषमः सत्रे नैतत् शक्यमजायत। अहं मुस्लिम-महिलाःविश्वासयामि यत् कृत्स्नोह्यपि देशः ताभ्यो न्यायं प्रदापयितुं पूर्ण-शक्त्या सन्नद्धोह्यस्ति। यदा वयं देशहितार्थम् अग्रेसरामः तदा, निर्धनानां, पश्चवर्तिनां, शोषितानां, वञ्चितानां च जीवनानि परिवर्तयितुं शक्यन्ते। प्रावृट्-कालिक-सत्रे क्रमेह्यस्मिन् सर्वेह्यपि सम्भूय आदर्शमेकंप्रस्तुतवन्तः। अहं देशस्य सर्वान् अपि सांसदान् सार्वजनिकरूपेण अद्य हार्दिकान् साधुवादान् व्याहरामि।

मम प्रियाः देशवासिनः ! एतेषु दिनेषु कोटि-कोटि-देशवासिनः जकार्ता-नगर्यां सम्पद्यमानानाम् एशियन्-क्रीडा-स्पर्धानां विषये दत्तावधानाः सन्ति। प्रतिदिनं प्रातः जनाःसर्वप्रथमं वार्तापत्राणि वा दृश्यवाहिनीः वा सामाजिक-संचार-माध्यमानि सोत्सुकं दृष्ट्वा अवगन्तुं प्रयतन्ते यत् केन कया वा भारतीय-क्रीडकेन क्रीडिकया वा पदकं विजितम्। एशियन्-क्रीडा-स्पर्धाः साम्प्रतमपि प्रवर्तन्ते। देशस्य कृते पदक-विजेतर्नि् सर्वान् अपि क्रीडकान् अभिनन्दामि। तेभ्योह्यपि क्रीडकेभ्यः मम भूरिशः शुभ-कामनाः येषां यासाञ्च स्पर्धाः साम्प्रतमपि अवशिष्टाः सन्ति। भारतस्य क्रीडकाः विशेषेण Shooting-Wrestling-इति लक्ष्यवेध-मल्ल-स्पर्धासु तु उत्कृष्ट-प्रदर्शनं कुर्वन्त्येव परञ्च अस्माकीनाः क्रीडकाः क्रीडिकाश्च तास्वपि स्पर्धासु पदकानि अधिगच्छन्ति, यासु पूर्वम् अस्माकं प्रदर्शनं तादृक् समीचीनं नासीत्। एतानि न केवलं पदकानि अपि तु,भारतीय-क्रीडानां क्रीडकानां क्रीडिकानाञ्च नभःस्पर्शि-समुत्साहस्य स्वप्नानाञ्च प्रमाणमस्ति। देशस्य कृते पदक-विजेतृषु अस्माकीनाः पुर्त्यः अपि सन्ति इति नूनं भूयान् सकारात्मक-संकेतः। पदक-विजेतृषु न्यूनायुष्मन्तो युवानः तथा च एतेषु अधिसंख्यं लघु-लघु-ग्राम-जनपद-वास्तव्याः चेति परिभाव्य मोमुद्यते अस्माकीनं मानसम्।

मासेह्यस्मिन् ऊन-त्रिंशत्तमे दिनाङ्के वयं 'राष्ट्रिय-क्रीडा-दिवसम्' आयोजयिष्यामः, शुभेह्यस्मिन् अवसरे अहं सर्वेभ्योह्यपि क्रीडा-प्रेमिभ्यः शुभकामनाः निवेदयामि, युगपदेव हॉकी-क्रीडायाः महते क्रीडकाय श्रीध्यानचंद-वर्याय स्वीयं श्रद्धांजलिम् अर्पयामि। अहं देशस्य सर्वान् अपि नागरिकान् निवेदयामि यत् ते अवश्यं क्रीडन्तु तथा च, स्वीय-सुस्वास्थ्यस्य कृते विशेषेण अवधानं दद्युः, यतो हि स्वस्थं भारतमेव सम्पन्नं समृद्धञ्च भारतंनिर्मास्यति। यदा भारतं स्वस्थं भवति, तदैव उज्ज्वल-भविष्यतः निर्माणं भविता। पुनरेकवारं एशियन्-क्रीडा-स्पर्धालून् पदक-विजेतर्नि् अभिनन्दामि शेष-क्रीडकानां उत्कृष्ट-प्रदर्शनञ्च कामये। सर्वेभ्योह्यपि राष्ट्रिय-खेलदिवसस्य कोटिशः शुभकामनाः।

'प्रधानमन्त्रि-महोदय !नमस्कारः ! अहं कानपुरतः भावनात्रिपाठी, आभियान्त्रिक्याः छात्रास्मि। प्रधानमन्त्रि-महोदय ! विगते 'मनकीबात'-प्रसारणे भवान् महाविद्यालयीयैः छात्रैः छात्राभिः च समभाषत, तत्पूर्वमपि चिकित्सकैः लेखा-परीक्षकैश्च साकं भवान् समभाषत। ममैका प्रार्थनास्ति यत् आगामिनि सेप्टेम्बर-मासे पञ्चदशे दिनेआभियान्त्रिकी-दिवसोह्यस्ति, तदुपलक्ष्य भवान् यदि अस्माभिः आभियान्त्रिकी-च्छात्रैः छात्राभिश्च साकं सम्भाषणं करोतु,येन अस्मदीयं मनोबलं वर्धिष्यते, वयञ्च प्रसन्नतामनुभविष्यामः, तथा च, भविष्यति काले स्वीय-देशस्य कृते किञ्चित् कर्तुं वयम् प्रोत्साहनमपि लप्स्यामहे, धन्यवादः।'

नमस्तेभावना-महोदये ! अहं भवत्याः भावनायाः आदरं करोमि। वयं सर्वेह्यपि प्रस्तरेष्टिकाभिः निर्मीयमाणानि गृहाणि भवनानि चावलोकितवन्तः परञ्च, किं भवन्तः कल्पयितुं शक्नुवन्ति यत् प्रायेण द्वादश-शत-वर्षेभ्यः प्राक् विशालमेकं पर्वतं,यः एक-शिलात्मकः एवासीत्, तम् उत्कीर्य उत्कृष्टम् , विशालम्,अद्भुतञ्च मंदिर-स्वरूपम् प्रदत्तम्। स्यात् एतादृशी कल्पना अशक्या प्रतीयते परञ्च तत् सञ्जातं महाराष्ट्रस्य एलोरास्थितस्य कैलाशनाथमंदिरस्यविषये। यदि कश्चन भवन्तं कथयति यत् प्रायेण सहस्र-वर्षेभ्यः प्राक् granite -इति ग्रावायुतः षष्टि-मीटर-मितो लम्बायितः स्तम्भः विनिर्मितः। तथा च, तस्योपरि प्रायेण अशीति-टन्-भारयुतः शिलाखण्डः स्थापितः ङ्क तर्हि किं भवान् विश्वस्यति ? परञ्च,तमिलनाडुराज्ये तंजावुरे बृहदेश्वरमंदिरम् तत्स्थानमस्ति, यत्र स्थापत्यकलायाः आभियान्त्रिक्याश्च अविश्वनीय- मेलनम् अवलोकयितुं शक्यते । गुजरातस्य पाटण-नगरे एकादश-शताब्दस्य 'राणी नी वाव'- इति वापीं दृष्ट्वा सर्वोऽपि जनः आश्चर्यचकितो भवति। भारतभूमिःआभिया- न्त्रिक्याः प्रयोगशाला अवर्तत। भारते अनेकेतादृशाः अभियन्तारः अभूवन् ये अकल्पनीयम् कल्पयित्वा तत् साकारीकृतवन्तः, आभियान्त्रिकी-जगति च, चमत्कार-रूपाणि उदाहरणानि प्रस्तुतवन्तः। एतेषु महत्तमेषु भारतीयाभियन्तृषु भारतरत्नम् डॉ.एम्.विश्वेश्वरय्या (Dr. M. Vishveshwarya), अन्यतमः अभियन्ता येन कावेरीनद्याः उपरि कृष्णराजसागर-जलावष्टम्भः विनिर्मितः, तस्माच्च साम्प्रतमपि लक्षशो जनाः कृषकाश्च लाभान्विताः भवन्ति। तस्यैव स्मृतौ सेप्टेम्बर-मासे पञ्चदशे दिनेआभियान्त्रिकी-दिवसः आयोज्यते। यदाहं आभियान्त्रिक्याः चमत्कार-विषये ब्रवीमि तदा एकोत्तर-द्विसहस्रतमे वर्षे गुजराते कच्छ-प्रान्ते समापन्न-भूकंप-विषयिणीं घटना- मेकां स्मरामि। तदाहं स्वयंसेविरूपेण तत्र कार्यं कुर्वन् आसम्। तत्राहम् एकं ग्रामम् अगच्छम्, यत्र शताधिक-वर्षायुष्मती एका मातृचरणा दृष्टा। सा मां दृष्ट्वा उपहसन्तीव कथयन्ती प्रतीयते स्म यत् पश्यतु, मम लघुगृहं भूकंप-त्रयेण सन्ताडितं सत् न किमपि प्रनष्टम्। सावदत् यत् गृहमिदं अस्माकं पूर्वजैः अत्रत्य-प्रकृतेः अनुसारम् निर्मितम्। यदा वयं आभियान्त्रिकी-दिवसं आयोजयामः तदा अस्माभिः भविष्यद्विषयेह्यपि विचारणीयमस्ति। स्थाने स्थाने कार्यशालाः आयोजनीयाः। परिवर्तिते युगे अस्माभिः कानि कानि नूतन-वस्तूनि शिक्षितव्यानि शिक्षणीयानि च ? अद्यत्वे आपदा-प्रबन्धनं हि महत्त्वाधायि-कार्यं जातम्। विश्वं प्राकृतिकापदाभिः साकं संघर्ष-निरतं वर्तते। एतादृश्यां स्थितौ, स्वरूपात्मिकाभियान्त्रिक्याः नूतनं रूपं कीदृशं भविष्यति ? अस्याः पाठ्यक्रमः कीदृशः स्यात् ? छात्रेभ्यः किं किं शिक्षणीयम् ? संरचनात्मक-निर्माणं केन प्रकारेण पर्यावरनानुकूलं स्यात् ? स्थानिक-सामग्र्याः मूल्याकलनं कृत्वा निर्माणं केन प्रकारेण अग्रेसारणीयम् ? सुतरां अवकर-शून्यता केन प्रकारेण अस्मदीया प्राथमिकता भवेत् ? एतादृशाः अनेके बिन्दवः आभियान्त्रिकी-दिनावसरे नूनं विचारणीयाः।

मम प्रियाः देशवासिनः ! उत्सवानां परिवेशः तथा चामुना साकमेव दीपावल्याः सन्नद्धता अपि आरभ्यते । 'मनकीबात'-प्रसारण-व्याजेन सततं मेलिष्यामः,मनसः कथां कुर्वन्तो भविष्यामः, तथा च, निज-मनसा राष्टं अग्रेनेतुमपि सततं प्रयत्नं करिष्यामः। अनया भावनया साकं भवद्भ्यः सर्वेभ्यः शुभकामनाः। धन्यवादाः। पुनः मेलिष्यामः।

## संस्कृतं केवलं भाषा न अपितु जीवनपद्धतिरपि अस्ति

नवदेहली। संस्कृत केवलं भाषा न अपितु जीवनशैलिरपि अस्ति। चाणक्यपुरी स्थित मैत्रेयी महाविद्यालयस्य संस्कृत विभाग माध्यमेनयोजित एकादश दिवसीय संस्कृत सम्भाषण कार्यशालायाः समापनावसरे महाविद्यालयस्य प्रचार्या डॉ. हरित्या चोपड़ा उक्तवती।



दिल्ली वि. विद्यालस्य संस्कृत विभागीयाचार्य डॉ ओमनाथ विमली उक्तवान यत संस्कृत सम्भाषण कार्यशालायां संस्कृतेन् भिन्न अध्यापकानां सहभागिता अनया सुभ सुचकोऽस्ति। कार्यशालायां मुख्यातिथि लाः ब.शा.रा.सं विद्यापीठस्य छात्रकल्याण संकाय प्रमुखा प्रो. कमलाभारद्वाज उक्तवती यत्-संस्कृते आत्मीयता अस्ति। डॉ. प्रदीप राय उक्तवान यत् संस्कृतं संगणकाय सर्वोतम भाषारस्ति एवं तस्योच्चारणेन रक्तचाप, मधुमेह, इत्यादिभ्यः मुक्तिः भवति। प्रो. यशवीर सिंह उक्तवान यत् संस्कृत भाषा मनुष्ये संस्कार एवं सदाचरणस्य संचारः करोति। डॉ. नवीनशर्मा उक्तवान यत् संस्कृत भारती एतादृशं कार्यक्रमस्यायोजने तत्परोऽस्ति। कार्यक्रमे संस्कृतविभाग पक्षतः खुशवुशुक्ला व रिंकलं प्रशस्ति पत्रं दत्वा सम्मानितं कृतवान। मंचसंचालनं डॉ. अनिरुद्ध ओझा कृतवान।

**पाठकानां कृते सूचनाः-**

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- ( संस्थादीनां कृते ) द्विवार्षिकशुल्क रु. २४०/- ( व्यक्तीनां कृते ) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां ( A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-**

**Sanskrit samvad,**
**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

**महात्मा अटलविहारीवाजपेयी अमर रहें।**

## अश्रुपूर्णश्रद्धाञ्जलिदशकम्

-अरविन्दः

पर्यट्य भारतभुवि प्रचुरं नृसेवी
नव्यं विकास्य कमलं किल वाजपेयी।
जीवन् गतो दिविषदां नगरं मृतारिः
शृण्वन्तु हे सहृदया अटलो विहारी।। 1

व्यर्थं ब्रवीषि निजराष्ट्रज एष नेता
मृत्युं गतोऽद्य मतिमानटलो विहारी।
श्रान्तिं विनेतुमहहा दिवि देवतात्मा
मन्ये विशालहृदयो गतवान् महात्मा। 2

मृत्वापि यो जनमनस्सदने दयालुः
राराज्यते कविवरः प्रथितः कृपालुः।
भूत्वा युवा सकलराष्ट्रसुखाय सद्यः
श्रीमान् चलिष्यति महान् जननायकोऽयम्।। 3

केचिद् रुदन्ति सहसा विलपन्ति केचित्
केचिद्रवन्ति मनुजा मृतिवृत्तदुःखैः।
केचित् कपोलयुगलं स्रवदश्रुपातैः
संक्षालयन्ति जनताजनकप्रयाणे।। 4

रोरोत्ति दिव्यवसुधा निजपुत्रमृत्युं
श्रुत्वाधुना शृणुत हे कवयो दयार्द्रा।
शून्याङ्कमेव विकला प्रविलोक्य मूर्च्छा-
मेतीव हन्त हृदयं वदतीह तीव्रम्।5

आकाशमद्य विततं शशिसूर्यभातं
मुक्त्वा कपाटमभितः नयनाभिरामम्।
श्रीवाजपेयिविबुधं समवेक्षमाणं
रौतीव हे कविवरा मनुते मनो मे।। 6

देवाः प्रतप्तमनसो गगने विमानात्
नेतारमेवमधुना तु विलोकयन्तः।
वृष्टिं सृजन्ति कुसुमस्य नवां कवीन्द्राः
श्रीवाजपेयिमृतिविष्टर एव मन्ये।। 7

मन्ये रविर्घनवने प्रविलीय तप्तो
नो भाति हन्त गगने बहु खिद्यमानः।
नूनं भवन्ति विकला- सुजना जगत्यां
मुक्ते जने सहृदये भवबन्धनेभ्यः।। 8

वायुर्न वाति न सरित् वहतीव खिन्ना
नो पादपे विहगगुञ्जनमेव दृष्टम्।
याते बुधा अटल एव विदग्धजीवाः
मन्ये रुवन्ति सकलाः शिथिलायमानाः।। 9

मृत्यु- प्रभो तव विधे रचिता बलिष्ठा
सम्पातयत्यखिलजन्तुमियं विशिष्टा।
तस्यै नम- प्रणतिरस्तु नवाद्य तुभ्यं
श्रीवाजपेयिकवये च नमो मदीयम्।। 10



# राष्ट्रियकविसमवायस्य अन्ताराष्ट्रियसंगोष्ठ्याश्च समायोजनम्

अलीगढम्– गतमासे 28–29 हति दिनांकयोः उत्तरप्रदेशसंस्कृतसंस्थान–धर्मसमाजस्नातकोत्तरमहाविद्यालययोः संयुक्ततत्त्वाधानेन राष्ट्रियकविसमवायस्य अन्ताराष्ट्रियसंगोष्ठ्याश्च समायोजनमभूत्। दर्शनीयसमायोजनेऽस्मिन् कविसमवाये प्रो अरविन्दनारायणमिश्रः, डॉ शैलेशकुमारतिवारी, डॉ वेदव्रतः, डॉ राजेन्द्रत्रिपाठी रसराजः, डॉ प्रशस्यमिशास्त्री, आचार्यतुलसी परोहा,, डॉवेणीमाधवशास्त्री, आचार्यवागीशदिनकरः, प्रो अभिराजराजेन्द्रमिश्रः अन्ये च सरसमधुरकाव्यप्रवाहेण सर्वानपि व्यमोहयन्। कार्यक्रमस्य समुद्द्घाटनं महाविद्यालयस्य तेन संयोजकमहोदयः भूरिशः प्रशंसितः। नासावैज्ञानिकेन भारतसर्वकारप्रतिनिधिना प्रो ओमप्रकाशपाण्डेयमहोदयेन उद्घाटनसत्रे संस्कृतस्य विश्वव्यापकत्वं समुपपादितम्। यत् श्रुत्वा विस्मिता श्रोतारः कपोलपाणयोऽदृश्यन्त। महाकविनाभिराजेन विशालं संस्कृतं कीदृशमिति सम्यगुपपादितम्।



अभिराजराजेन्द्रमिश्रमहोदयाः आध्यक्ष्यमभजन्। सुकविभिः सुन्दरः सर्वरसपूर्णः काव्यपाठः श्रावितः। कार्यक्रमस्यास्य संयोजकेन डॉ द्वारिकाप्रसादत्रिपाठिनास्य संचालनं पद्येनाक्रियत। कविषु डॉ अरविन्दकुमारतिवारी, डॉ प्राचार्यमहोदयानां सचिवमहोदयानामेवं च बहूनां विदुषां महनीयोपस्थितौ दर्शनीयतां गतम्। सवैरपि संस्कृतस्य विषये स्वविचाराः प्रकटीकृताः। महाविद्यालयप्रशासेन पुनः पुनः एतादृशसंस्कृतकार्यक्रमस्य आयोजनं भवतु इति कांक्षितम्। श्रुत्वा सर्वेऽपि मुदिताः। अन्येऽपि सर्वेऽतिथयः निजश्रवणीयैः सद्विचारैरायोजनं सफलीकृतमिति। अवसरेऽस्मिन् विविधाः प्रतियोगिताः आयोजिताः। अत्र श्रीप्रेमशंकरशर्मविरचितं दिनत्रयम् इति यात्राकाव्यमपि सुकवीनां करकमलैः विमोचितम्।

# राष्ट्रियसंस्कृतसंस्थानस्य जम्मूपरिसरे संस्कृतसप्ताहमहोत्सवस्य सम्पन्नतासमारोहः

**–प्रो. वासुदेव शर्मा प्राचार्य**

जम्मूः, दिनाङ्कः 30.08.2018 राष्ट्रियसंस्कृतसंस्थानस्य



प्रशस्तिपत्रसमर्पणेन सम्मान्यमानः पद्मश्रीः डॉ.रमाकान्तशुक्लः

(मानितविश्वविद्यालयस्य) जम्मूस्थित–श्रीरणवीरपरिसरे 24.08.2018 दिनाङ्कात् 30.08.2018 दिनाङ्कपर्यन्तं सोल्लासमायोज्यमानः विविधस्पर्धा–कविगोष्ठी–श्रीशङ्करशास्त्रार्थादि–



प्रशस्तिपत्रसमर्पणेन सम्मान्यमानो डॉ.सतीशकुमारकपूरः प्रो.वासुदेवशर्मा



मञ्चस्था महानुभावाः क्रमशो वामतः डॉ.प्रभातकुमारमहापात्रः, पद्मश्रीः डॉ.रमाकान्तशुक्लः, श्रीकुलबीरसिंहः, प्राचार्यः प्रो. वासुदेवशर्मा, डॉ.सतीशकुमारकपूरश्च।

कार्यक्रमैरनुरञ्जितात्मा श्रावणीपर्वपुण्यपरिपुष्टश्च संस्कृतसप्ताहमहोत्सवोऽद्य सम्पन्नतामगात् । विद्वत्सम्माननं पुरस्कारवितरणं चापि समारोहस्यास्याभिन्नमङ्गमभूत् ।

परिसरप्राचार्यस्य प्रो.वासुदेवशर्मणोऽध्यक्षतायां सम्पन्नतासमारोहेऽस्मिन् राष्ट्रपतिसम्मानितो वरिष्ठ–पुलिस–अधीक्षकः श्रीकुलबीरसिंहो मुख्यातिथिरूपेण, मूर्धन्यः संस्कृतराष्ट्रकविः पद्मश्रीः डॉ.रमाकान्तशुक्लः सारस्वतातिथिरूपेण, साहित्यविभागाध्यक्षो डॉ.सतीशकुमारकपूरश्च सम्मान्यविद्वद्रूपेण समुपस्थिताः । ज्योतिषविभागाध्यक्षो डॉ.प्रभातकुमारमहापात्रो राशिस्वरूपविमर्शमधिकृत्य विशिष्टव्याख्यानं प्रास्तौत् ।

प्राचार्यमहोदयेन मुख्यातिथये जम्मूनगरस्य वरिष्ठ–पुलिस–अधीक्षकाय श्रीकुलबीरसिंहाय सादरं स्मृतिचिह्नमुपहृतम् ।

विद्वसम्माननोपक्रमे सारस्वतातिथेः पद्मश्री–डॉ.रमाकान्तशुक्लवर्यस्य साहित्यविभागाध्यक्षस्य डॉ.सतीशकुमारकपूरस्य च प्रशस्तिपत्रादिसमर्पणपुरस्सरं सम्माननं व्यधायि ।

स्वागतवचांसि :श्री शरत् चन्द्र शर्मा (आधुनिकविभागाध्यक्षः)

कार्यक्रमप्रतिवेदनमः डॉ. हरिशङ्कर पाण्डेयः (व्याकरणविभागः)

धन्यवादज्ञापनम्ः डॉ. रामदास संगोत्रा (ज्योतिषविभागः)

मञ्चसञ्चालनम् :डॉ. डी. दयानाथः (वेदविभागः)

अस्माकं प्रेरणास्त्रोतः– स्व.पं० रामकिशोरशर्मा,
परामर्शकाः–डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारीः
सम्पादिका–मञ्जूशर्मा, उपसम्पादकः– डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ– वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल–ऑफसेट–प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली–53तः मुद्रापयित्वा ए–2/32, वजीराबादमार्गः भजनपुरा, देहली–53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई–मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।